# १४. श्री श्रीशगुणदर्पणम्

या सुगंधास्यनासादिनवद्वाराऽखिलेन या ।
दुराधर्षा सर्वसस्योदयार्थं या करीषिणी ॥१॥

या नित्यपुष्टा सर्वांगैः सौंदर्यादिगुणैरपि ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥२॥

मातर्लक्ष्मि नमस्तुभ्यं माधवप्रियमानिनि ।
युवां विश्वस्य पितरावितरेतरयोगिनौ ॥३॥
समना किल मातस्त्वममुना ततयोगिनी ।
मम नाथेन देवश्च विमनाश्च न स त्वयि ॥४॥

त्वं वेदमानिनी  वेदवेद्यः किल स ते प्रियः ।
त्वं मूलप्रकृतिर्देवी स चादिपुरुषः किल ॥५॥

यस्त्वामुरसि धत्तेऽंब कौस्तुभद्युतिभासिते ।
स त्वां नैवाच्युतः सर्वस्यात्यये सत्यपि त्यजेत् ॥६॥

देवि त्वं ललनारत्नं देवोऽसौ पुरुषोत्तमः ।
युवां युवानौ सततं युवयोर्न वयोऽधिकः ॥७॥

त्वं पद्मिनी पद्मवक्त्रा पद्माक्षी पद्मविष्टरा ।
पद्मद्वयधरा पद्मकोशोद्यस्तनशोभना ॥ ८॥

पद्महस्ता पद्मपादा पद्मनाभ मनःप्रिया ।
पद्मोद्भवस्य जननी पद्मा च वरवर्णिनी ॥९॥

अंबां पीतांबरश्रोणीं लंबालकलसन्मुखीम् ।
बिंबाधरोष्ठीं कस्तूरिजंबालतिलाकां भजे ॥१०॥

रत्नोदीप्तसुमांगल्यसूत्रावृतशिरोधराम् ।
कुंडलप्रभयोद्दंडगंडमंडलमंडिताम् ॥११॥

कुचकंचुकसंचारिहारनिष्कमनोहराम् ।
कांचीकिंकिणिमंजीरकंकणाद्यैरलंकृताम् ॥१२॥

सुवर्णमंडपे रत्नचित्रसिंहासनोत्तमे ।
नमामि हरिणा साकमिंदिरां कृतमंदिराम् ॥१३॥

ब्रह्माद्या विबुधश्रेष्ठा ब्रह्माण्याद्याः सुरांगनाः ।
यां पूजयंते सेवंते सा मां पातु रमा सदा ॥१४॥

सर्वालंकारभरितौ सर्वज्ञौ सर्वसद्गुणौ ।
शर्वादिसर्वभक्तौघ सर्वसर्वस्वदायकौ ॥१५॥

सुमुखौ सुंदरतरौ सुनासौ सुखचित्तनू ।
सुराराधितपादाब्जौ रमानारायणौ स्तुमः ॥१६॥

चतुष्कपर्दा या देवी चतुरास्यादिभिः स्तुता ।
चतुर्वेदोदितगुणा चतुर्मूर्तेर्हरेः प्रिया ॥१७॥

घृतप्रतीकां तां नित्यं घृतपूर्णान्नदायिनीम् ।
यथेष्टवित्तदात्रीं च नतोऽस्म्यभयदां श्रियम् ॥१८॥

वादिराजेन रचितं श्री श्रीशगुणदर्पणम् ।
इमं स्तवं पठन् मर्त्यः श्रीमान् स्यान्नात्र संशयः ॥१९॥

॥इति श्री वादिराजपूज्यचरणविरचितं श्री श्रीशगुणदर्पणस्तोत्रम् ॥